[८९४] युष्मदस्मदोर्विभाषा अनन्वादेश[1] इति वक्तव्यम् । (म. भा. ३.३७३)

इह मा भूत्, अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलो मे स्वम् । अपर आह –

[८९५] सर्व एव वान्नावादयोऽनन्वादेशे[2] विभाषा वक्तव्याः ।

कम्बलस्ते स्वम्, कम्बलस्तव स्वम् । [3]कम्बलो मे स्वम्, कम्बलो मम स्वम् । अनन्वादेशे इति किम् ? अथो [4]कम्बलस्ते स्वम् । अथो[5] कम्बलो मे स्वम् । न तर्हि इदानीमिदं वक्तव्यम् 'सपूर्वायाः प्रथमाया विभाषा' इति ? वक्तव्यं च । किं प्रयोजनम् ? अन्वादेशार्थम् । अन्वादेशे [6]हि विभाषा यथा स्यात्[7] । अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलस्तव स्वम् । अथो ग्रामे कम्बलो मे स्वम्, अथो ग्रामे कम्बलो मम स्वम् ॥

## तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः । (२७/३९३४)

तिङन्तात् पदात् पराणि गोत्रादीनि कुत्सने आभीक्ष्ण्ये चार्थे [8]वर्तमानानि अनुदात्तानि भवन्ति । पचति गोत्रम् । जल्पति गोत्रम् । आभीक्ष्ण्ये – पचति पचति गोत्रम् । जल्पति जल्पति गोत्रम् । ब्रुवः – पचति ब्रुवम् । जल्पति ब्रुवम् । पचति पचति ब्रुवम् । जल्पति जल्पति ब्रुवम् । [9]ब्रुवः इति ब्रुवः कन्निपातनाद् वच्यादेशाभावश्च ।

गोत्र । ब्रुव । प्रवचन[10] । प्रहसन । प्रकथन । [11]प्रत्ययन । प्रचक्षण । प्राय । विचक्षण । अवचक्षण । स्वाध्याय । भूयिष्ठ । 'वा नाम' (ग. सू. १७८) ।

नाम इत्येतद्वा निहन्यते । पक्षे [12]आद्युदात्तमेव भवति । पचति नाम । पठति नाम । तिङः इति किम् ? कुत्सितं गोत्रम् । गोत्रादीनि इति किम् ? पचति पापम् । कुत्सनाभीक्ष्ण्ययोः इति किम् ? खनति गोत्रं समेत्य कूपम् । कुत्सनाभीक्ष्ण्यग्रहणं च [13]पाठविशेषणं द्रष्टव्यम् । तेनान्यत्रापि गोत्रादि[14]ग्रहणेन कुत्सनाभीक्ष्ण्ययोरेव कार्यं भवति (म. भा. ३.३७४) ॥

## तिङ्ङतिङः । (२८/३९३६)

तिङन्तं पदम् अतिङन्तात् [15]पदात् परम् अनुदात्तं भवति । देवदत्तः पचति । यज्ञदत्तः पचति । तिङ इति किम् ? नीलम् उत्पलम् । [16]शुक्लं वस्त्रम् । अतिङः इति किम् ? भवति पचति ॥

---

1. इष्यते इत्यधिकम् इ. 2. विषये इत्यधिकम् ह. 3. कम्बलो – न तर्हि नास्ति ड. 4–5. ग्रामे इत्यधिकम् क. 6. हि नास्ति ड. 7. अनन्वादेशे सर्वत्र विकल्पः । अन्वादेशे नित्यं वांनावादयः । सपूर्वायाः प्रथमायाः अन्वादेशविकल्पः इति इत्यधिकम् क. 8. वर्तमानानि नास्ति ह. 9. ब्रुवेः क. 10. प्रचन इत्यधिकम् ड. 11. अन्याय इत्यधिकम् क. 12. आद्युदात्तत्वम् ड. 13. एतत् गोत्रादीनां पाठविशेषणार्थं द्रष्टव्यम् क. ड. ह. 14. ग्रहणे ड. 15. पदात् नास्ति क. इ. 16. उदाहरणमिदं नास्ति ड. इ. ह.